## ❊ व्याकरणशास्त्रस्य परम्परा

वाल्मीकिरामायणेन ज्ञायते यत् त्रेतायुगे भगवतः श्रीरामचन्द्रस्य समयेऽपि व्याकरण-शास्त्रस्य सुव्यवस्थितं पठनपाठनमासीदिति ज्ञायते। तदुक्तं वाल्मीकिरामायणस्य किष्किन्धा-काण्डे -

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**
**बहु व्याहरताऽनेन न किञ्चिदपभाषितम्॥**[४]

हनुमतः ईदृक् वाक्पटुत्वं युक्तमेवासीत्, यतोहि हनुमतः पिता वायुः शब्दशास्त्रविशारद आसीत्। तथोक्तं वायुपुराणे -

**तत्राभिमानी भगवान् वायुश्चातिक्रियात्मकः।**
**वातारणिः समाख्यातः शब्दशास्त्रविशारदः॥**[५]

एवं व्याकरणशास्त्रस्य प्राचीनतमत्वं सिद्ध्यति। अथ च पाणिनीयव्याकरणे स्मृताः संज्ञा अपि प्राचीनाः। तासु कासाञ्चित् निर्देशो गोपथब्राह्मणे अवलोक्यते -

---

१. ऋ.पदपाठः.१.३.१०
२. तदेव.१.६.७
३. तदेव.१.३.३
४. वा.रा.किष्कि.३.२९
५. वा.पु.२.४४

Scanned by CamScanner

ओङ्कारम्पृच्छामः, को धातुः, किम्प्रातिपदिकम्, किं नामाख्यातम्, किं लिङ्गम्, किं वचनम्, का विभक्तिः, कः प्रत्ययः, कः स्वरः, उपसर्गो निपातः, किं वै व्याकरणम्, को विकारः को विकारी, कतिमात्रः, कति वर्णः, कत्यक्षरः, कति पदानि, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम्।[१]

पुराकल्प एतदासीत्, संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयन्ते[२] इति महाभाष्यानुसारेण ज्ञायते यदत्यन्तपुराकाले व्याकरणशास्त्रोत्पत्तिर्जाता। सर्वेषां नामशब्दानां निष्पत्तिदर्शकं मूर्धाभिषिक्तं शाकटायनव्याकरणमपि यास्कात् प्रागेवनिर्मितमासीत्। तदुक्तं निरुक्ते - न सर्वाणीति गार्ग्यो वैयाकरणानां चैके। तत्र नामान्याख्यातजानीतिशाकटायनो नैरुक्तसमयश्च।[३]

तत्रापरा ऋग्वेदो, यजुर्वेदः, सामवेदोऽथर्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्जो, ज्यौतिषमिति।[४]

सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।।[५]

भारतीय ऐतिह्यग्रन्थेषु सर्वासामपि विद्यानां प्रथमः प्रवक्ता ब्रह्मेत्युक्तम्। तदनुसारेण व्याकरणशास्त्रस्य आदिमः प्रवक्ता अपि - ब्रह्मा इति सुनिश्चितम्। तदुक्तम् ऋक्तन्त्रकृता -

---

१. गो.ब्रा.१.२४
२. म.भा.१.१, पृ.१६
३. निरु.१.४.१
४. मु.उ.२.५, पृ.१५
५. म.भा.उ.प.४३.६१, पृ.१४४

Scanned by CamScanner

**ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्य**[1] इति।

पातञ्जलमहाभाष्याज्ज्ञायते यद् बृहस्पतिना इन्द्राय प्रतिपदपाठद्वारा शब्दोपदेशो विहितः। तथा हि - **बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्द-पारायणं प्रोवाच न चान्तं जगाम।**[2] सर्वप्रथमम् इन्द्र एव शब्दोपदेशस्य प्रतिपदपाठरूपं काठिन्यमवगत्य पदानां प्रकृतिप्रत्ययादिविभागरूपशब्दोपदेशमकल्पयत्। तदुक्तं, तैत्तिरीय-संहितायाम् - **वाग् वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति, तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोदिति।**[3] तस्य व्याख्यानं कुर्वता सायणाचार्येणोक्तम् - **तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राऽकरोदिति।**[4]

व्याकरणशास्त्रे सम्प्रदायद्वयं प्रसिद्धमस्ति, ऐन्द्रशैवभेदात्। वर्तमानप्रसिद्ध्यनुसारेण ऐन्द्रसम्प्रदायस्य कातन्त्रव्याकरणं शैवसम्प्रदायस्य च पाणिनीयव्याकरणमस्ति। निरुक्तस्य-**बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च**[5] इति वचने बहुवचननिर्देशेन ज्ञायते यद् वेदाङ्गानामाद्यप्रवचनकर्तारोऽनेके आचार्या आसन्।

अर्वाचीनाः ग्रन्थकाराः प्रधानतया अष्टानां वैयाकरणानामुल्लेखं कुर्वन्ति। हैमबृहद्वृत्त्य-वचूर्णिग्रन्थे तृतीयपृष्ठे ब्राह्म-ऐशान-ऐन्द्र-प्राजापत्य-बार्हस्पत्य-त्वाष्ट्राऽपिशल-पाणिनीये-त्येतेषाम् अष्टानां व्याकरणग्रन्थानामुल्लेख उपलभ्यते -

---

१. ऋ.त.१.४
२. म.भा.१.१
३. तै.सं.६.४.७
४. सा.भा.उपो.१, पृ.३६
५. निरु.१.६.६

Scanned by CamScanner

**ब्राह्ममैशानमैन्द्रश्च प्राजापत्यम्बृहस्पतिम्।**

**त्वाष्ट्रमापिशलञ्चेति पाणिनीयमथाष्टकम्॥**

बोपदेवेन स्वकीये **कविकल्पद्रुम** इत्यभिधेये ग्रन्थरत्ना इन्द्र-चन्द्र-काशकृत्स्ना-आपिशल-शाकटायन-पाणिनि-अमर-जैनेन्द्र इत्येतेषामष्टानां वैयाकरणानाम् उल्लेखो विहितः। यथा -

**इन्द्रश्चन्द्रः काशकृत्स्नाऽऽपिशली शाकटायनः।**

**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥**[१]

वाल्मीकिरामायणस्य उत्तरकाण्डे नवव्याकरणानामुल्लेख उपलभ्यते, परन्तु तानि व्याकरणानि कानीति न सम्यग् ज्ञायते। श्रीतत्त्वविधि इत्यभिधेये वैष्णवग्रन्थे इन्द्र-चन्द्र-काशकृत्स्न-कुमार-शाकटायन-सारस्वत- आपिशल-शाकल्य-पाणिनीनां नव वैयाकरणानामुल्लेखो विहितः -

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**

**सारस्वतञ्चापिशलं शाकल्यम्पाणिनीयकम्॥**[२]

## ☀ नवानां व्याकरणानां संक्षिप्तपरिचयः

**१. ऐन्द्रव्याकरणम् :-** अदितिकश्यपयोः सुतेनेन्द्रेण व्यरचीदं व्याकरणम्। बृहस्पति शिष्योऽयम्।[३] ऐन्द्रव्याकरणेऽस्मिन् पञ्चविंशतिसहस्रसंख्याकाः श्लोकाः आसन्निति, हिमवत्पर्वत-निवासिनोऽस्य कालो विक्रमतः ९,५०० पूर्वमासीदिति च ज्ञायते।[४]

---

१. म.भा.प.आ.पृ.७८

२. सं.व्या.इ.पृ.६५

३. तदेव.पृ.८०

४. तदेव.पृ.७०-७९

Scanned by CamScanner

२. **काशकृत्स्नव्याकरणम् :-** काशकृत्स्नेन प्रोक्तमिदम्। काशकृत्स्नेः पुत्रोऽयम्। उत्तर-भारतीयस्यास्य गुरोर्नाम बादरायणः। **त्रिकं काशकृत्स्नमिति** काशिकावृत्तिग्रन्थेनास्य[१] व्याकरणमध्यायत्रयसंवलितमिति ज्ञायते। महाभाष्येऽस्य नाम स्मर्यते।[२] काशकृत्स्नव्याकरणं **शब्दकलाप** इत्यपि नाम्नाऽभिधीयते। पाणिनेः पूर्वकालिकोऽयमित्येव[३] ज्ञायतेऽस्य काल-विषये इदमित्थमिति वक्तुं न शक्यते।

३. **आपिशलिव्याकरणम् :-** अस्य प्रणेताऽऽपिशलिः। **वा सुप्यापिशलेः**[४] इति पाणि-नेरष्टाध्याय्यां काशिकावृत्तौ[५] च स्मृतोऽयमपिशलस्य सुत इति स्पष्टीभवति। प्राग्देशीयोऽयं विक्रमतः ३००० वर्षेभ्यः पूर्वकालिकः। अष्टका आपिशलपाणिनीयाः इति वचनेनाऽस्य व्याकरणेऽध्यायानां संख्या अष्टाविति प्रतीयते।[६]

४. **शाकटायनव्याकरणम् :-** शाकटायनेन प्रणीतमिदं व्याकरणम्। **व्याकरणे शकटस्य च तोकम्** इति पतञ्जलिमहर्षेर्वचनेन[७] अस्य पिता शकटः। शकटस्यापत्यमित्यर्थे शकट-शब्दात् फक् प्रत्यये[८] रूपमिदम्। काण्वशिष्योऽयम्। **नाचार्य राजर्हिक्संयुक्तज्ञात्याख्येभ्यः**[९] इति सूत्रे सिद्धान्तकौमुद्यां शाकटायनपुत्र इत्युदाहरणादनेनास्य कश्चित् पुत्रः आसीदिति निर्णीयते।

---

१. का.वृ. चरमभागः, पृ.८९
२. म.भा.१.१.१, पृ.७८
३. सं.व्या.इ.पृ.१०३-१२२
४. अष्टा.६.१.९२
५. का.वृ.प्रथमभागः, पृ.६०
६. सं.व्या.इ.पृ.१३८
७. म.भा.३.३.१, पृ.२१६
८. नडादिभ्यो फक्, ४.१.९९, पृ.३७
९. अष्टा.६.२.१३३

Scanned by CamScanner

अथवा भवति वै कश्चिज्जाग्रदपि वर्तमानं कालं नोपलभते। तद्यथा वैयाकरणानां शाकटायनी रथमार्ग आसीनः शकटसार्थं यान्तं नोपलभते इति महाभाष्यकाराणां वचनेन[१] शाकटायनस्य जीवनेऽविस्मरणीया विशिष्टा च काचन घटना संवृत्तेति ध्वन्यते।

अनुशाकटायनं वैयाकरणाः, उपशाकटायनं वैयाकरणाः इत्युदाहरणादनेन[२] शाकटायनस्य महावैयाकरणत्वं स्पष्टमेव लभ्यते। अस्य व्याकरणपरिमाणविषये प्रमाणं किमपि नोपलभ्यते। विक्रमात् ३००० वर्षेभ्यः पूर्वकालिकः शाकटायनः।[३]

**५. शाकल्यव्याकरणम् :-** पाणिनिप्रणीतायामष्टाध्याय्यां शाकल्यस्य नाम स्मृतम्।[४] अतोऽयं ततः पूर्वकालिक इति निस्सन्दिग्धम्। शकलशब्दादपत्यर्थे यञ् प्रत्यये[५] निष्पन्नेन शाकल्यशब्देन सूच्यते यदस्य पिता शकल इति। उभयविधानां लौकिकवैदिकशब्दानामन्वाख्यानमत्र कृतम्। अस्य कालः विक्रमतः ३२०० वर्षेभ्यः पूर्वतनः।[६] **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** इति सूत्रभाष्ये[७] शाकल्यनियमानां शाकलशब्देनोल्लेखनं दृश्यते।

**६. चान्द्रव्याकरणम् :-** चन्द्रगोमी कर्ताऽस्य व्याकरणस्य। पाणिनीयं व्याकरणम् उपजीव्येदं व्याकरणं व्यरचि। अयं बौद्धमतानुयायी वङ्गदेशीयश्च। विक्रमतः एकसहस्रवर्षपूर्ववर्ती।[८] चन्द्रगोमी कस्मिन्देशे उवासेति विषये नोपलभ्यते स्पष्टं प्रमाणम्।

---

१. म.भा.परोक्षे लिट्, ३.२.११५, पृ.१७९ २. का.वृ.प्रथमभागः, पृ.६१७-६१८

३. सं.व्या.इ.पृ.१३४

४. सम्बुद्धौ शाकल्यस्येतावनार्षे - १.१.१६, इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च - ६.१.१२७, लोपः शाकल्यस्य - ८.३.१९, सर्वत्र शाकल्यस्य - ८.४.५१

५. अष्टा.४.१.१०५, पृ.३७ ६. सं.व्या.इ.पृ.१७२

७. अष्टा.६.१.१२७, म.भा.पृ.७७२ ८. सं.व्या.इ.पृ.५७०

Scanned by CamScanner

**७. सारस्वतव्याकरणम् :-** सारस्वतव्याकरणमिदमनुभूतिस्वरूपाचार्यप्रणीतमस्ति। अस्य व्याकरणस्य विषये बहूनां तर्काणामावश्यकता नास्ति। यतो हि ग्रन्थोऽयमिदानीं सर्वत्रोपलभ्यते। कचित् प्रदेशेष्विदानीमस्य व्याकरणस्याध्ययनाध्यापने प्रचलतीस्तः। अत्र भाषायां नियमाः सरलतया प्रतिपादिताः। अस्य ग्रन्थस्य व्याख्याता श्रीचन्द्रकीर्तिसूरिः। १९३८ तमे वर्षे मुम्बईनगर्यां निर्णयसागरमुद्रणालये प्रकाशितोऽयं ग्रन्थः। अत्र ग्रन्थे प्रथमतोऽयं श्लोको दृश्यते[१] -

**प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये।**

**सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम्॥** इति।

अनुभूतिस्वरूपाचार्याणां श्रूयत इदमैतिह्यं[२] यथा - पुरा किल कस्मिंश्चित् समये विद्वदृषभः अनुभूतिस्वरूपाचार्यः पण्डितवृन्दालङ्कृतपरिषदि पुंक्षु इति प्रयुयुजे। तच्छ्रुत्वा पण्डितैः परिहासः कृतः अशुद्धोऽयं प्रयोगः कृत इति। तस्य प्रयोगस्य सिद्धिप्रकारः प्रदर्शनीया इत्यप्याक्षेपोऽकारि विद्वद्भिः।

तदा सः गृहं गत्वा स्वस्योपास्यदेवतां सरस्वतीं प्रार्थयामास। सन्तुष्टा सा सानुग्रहं तस्मै सप्तशतं सूत्राण्युपादिशत्। तदाधारेणैव इदं सारस्वतव्याकरणं व्यरचि। सरस्वत्या भगवत्या अनुग्रहेण प्राप्तमिति निदानेनास्य सारस्वतव्याकरणम् इति प्रसिद्धिः। अस्य ग्रन्थस्यान्ते दृश्यतेऽयं श्लोकः यथा[३] -

---

१. सा.व्या.पृ.१

२. सं.व्या.इ.पृ.६२६

३. सा.व्या.पृ.४६५

Scanned by CamScanner

अवताद् वो हयग्रीवः कमलावर ईश्वरः।

सुरासुरनराकारो मुधुपापीतपङ्कजः ।। इति।

अनेन श्लोकेन हयग्रीवोपासका एव इति स्पष्टम्। तदुपासना च दक्षिणभारतदेशे विशेषतः पाल्यते। अतोऽनुमीयते अनुभूतिस्वरूपाचार्याः दाक्षिणात्याः इति। अस्य च कालः प्रायो विक्रमात् १२५० संवत्सर इति वक्तुं शक्यते।[१]

**८. कौमारव्याकरणम् :-** पूर्वमुक्तदिशा नवानां व्याकरणानां मध्ये कौमारमप्यन्यतमम्। परन्त्वस्य व्याकरणस्य विषये कर्तृ तत्कालादिविषये च किमपि प्रमाणं नोपलभ्यते। एतानि च अष्टौ व्याकरणानि कालवशाद् दूरीभूतानि। पठनपाठनादिकश्चैषां लुप्तप्रायमेव। लोके इदानीं विशिष्य पाणिनीयव्याकरणस्यैव प्रचारो दृश्यते। अतः पाणिनिप्रभृतीनां परिचयः किञ्चिदिव विधीयते।

## ❊ त्रिमुनिव्याकरणम्

**१. पाणिनिः :-** संस्कृतव्याकरणशास्त्रेतिहासाऽऽलोडने कृते ऐन्द्र-चान्द्र-काशकृत्स्न-आपिशलादिभ्यः प्रामुख्यं भजमानेषु व्याकरणेषु रत्नायमानं साङ्गोपाङ्गं पाणिनीयमेव व्याकरणं समुपलभ्यते। संस्कृतवाङ्मयस्य अनुपमरत्नस्वरूपमिदं व्याकरणमित्यत्र नास्ति सन्देहलेशोऽपि। पूर्वप्रोक्तेषु व्याकरणेषु सम्पूर्णस्य शब्दजातस्य व्युत्पत्तिसामर्थ्यमनवलोक्य महामुनिः पाणिनिर्लौकिकछान्दसोभयविधप्रयोगसाधनार्थं महेश्वरप्रसादलब्धौजसा **अष्टाध्यायी** ग्रन्थं प्रणिनाय।

---

१. सं.व्या.इ.पृ.६२६

Scanned by CamScanner

पाणिनिनाम्नैव पणनं पणः, पणः अस्य अस्तीति पणी, पणिनो गोत्रापत्यं पाणिनिरिति व्युत्पत्त्या पाणिनेर्नामान्वर्थतां भजते। पुरुषोत्तमदेवेन त्रिकाण्डशेषे[1] पाणिनेरधोलिखितानि नामान्तराण्युक्तानि -

| | | |
|---|---|---|
| १. पाणिन | २. पाणिनि | ३. दाक्षीपुत्र |
| ४. शालङ्कि | ५. शालातुरीय | ६. आहिक |

श्लोकात्मकपाणिनीयशिक्षाया याजुषपाठे पाणिनेराचार्यस्य **पाणिनेय** इत्यपि नामोपलभ्यते। यशस्तिलकचम्प्वां **पणिपुत्र** शब्दस्यापि व्यवहारो दृश्यते। तेनास्य पितुर्नाम पणिरिति सम्भाव्यते। शालङ्किनाम्ना पाणिनेः पितुर्नाम **शलङ्कु** इति महामहोपाध्याय पण्डितशिवदत्तशर्ममहोदयानां मतम्।[2] पैलादिगणे **शालङ्कि** पाठसामर्थ्यात्[3] **शाङ्कल** शब्दस्य शलङ्क आदेशो इञ् प्रत्ययो भवति[4], ञित्वाच्च आदिवृद्धिः। परन्तु श्री.पं.युधिष्ठिरमीमांसकमहोदयमतानुसारेण पाणिनेः पितुर्नाम **पाणिन्** आसीदिति ज्ञायते।[5] पाणिनिशब्दव्युत्पत्तिविषये वैयाकरणेषु मतद्वयमस्ति। प्रथममतानुसारेण पाणिन् शब्दादपत्येऽर्थे अणप्रत्यये **पाणिन** इति व्युत्पद्यते, पुनश्च तस्मादपत्यार्थे इञ् प्रत्यये **पाणिनि** इति रूपं सिद्ध्यति।[6]

---

१. पाणिनिस्त्वाहिको दाक्षीपुत्रः, शालङ्कि पाणिनौ। शालोत्तरीयः ......।

२. म.भा.भूमिका, पृ.१४

३. पैलादिभिश्च, अष्टा.२.४.५९

४. पैलादिगण एव ज्ञापक इञो भावस्य, का.वृ.४.१.९९

५. सं.व्या.इ.प्रथमभागः, पृ.१८२,१८३

६. पणिनेऽपत्यमित्यण् पाणिनः। पाणिनस्याऽपत्यं युवा इति इञ् पाणिनिः। म.भा.प्र.१.१.७३, पाणिनो गोत्रापत्यं पाणिनः, तस्यापत्यं पाणिनिः। बा.म.प्रथमभागः, पृ.३९२

Scanned by CamScanner

द्वितीयमतानुसारेण नकारान्तस्य **पाणिन्** शब्दस्य पर्यायः **पणिन** इत्यकारान्तः स्वतन्त्रशब्दोऽस्ति। यस्मात् **अत इञ्**[१] इति सूत्रेण इञ् प्रत्यये 'पाणिनि' शब्दो व्युत्पद्यते।[२] पाणिनये प्रयुक्तः पणिपुत्र शब्दोऽपि अस्त्यैव तथ्यस्य ज्ञापको यत् पाणिनिः पणिन् (नकारान्तस्य) इत्यस्यापत्यं न तु 'पणिन' इत्यस्य। 'पणिन्' इति नकारान्तशब्दादपि बाह्वादिगणस्य[३] आकृति-गणत्वात् इञ्प्रत्ययः सम्भाव्यते। अत्र मतद्वये श्री मीमांसकमहोदयाः द्वितीयमतमेव युक्तं मन्यन्ते, गोत्रप्रकारेषु "पाणिन-पाणिनि" इत्युभयोर्नाम्नोः गोत्ररूपेण स्मृतत्वात्। प्रथमपक्ष-स्वीकारे "पाणिन" इति गोत्रं भविष्यति, "पाणिनि" इति च युवा।

**सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः**[४] इति महाभाष्यनिर्देशादस्य मातुर्नाम दाक्षी इति ज्ञायते। संग्रहकारस्य व्याडेर्नाम बहुधा महाभाष्यकारेणोक्तम् - **दाक्षायण**[५] इति। तदनु-सारेण दाक्षायणो व्याडिः पाणिनेर्मातुलपुत्र इति प्रतीयते। परन्तु काशिकायां (६.२.६९) **कुमारी दाक्षाः** इत्युदाहरणे दाक्षायण एव 'दाक्षि' नाम्ना स्मृतः। अतः प्राचीनपद्धत्या दाक्षि-र्दाक्षायणश्च इत्युभयमपि नाम संग्रहकारस्य व्याडेराचार्यस्यैवाऽस्ति। अतः दाक्षि-दाक्षायणि उभयनामभ्यां प्रसिद्धो व्याडीर्दाक्षीपुत्रस्य पाणिनेर्मातुल एव आसीदिति ज्ञायते। एतेन व्याडे-र्भगिन्याः दाक्ष्या नाम 'व्याड्या' इत्यप्यासीत् इति ज्ञायते। वेदार्थदीपिकायां छन्दः शास्त्र-प्रवक्तुः पिङ्गलस्य पाणिनिभ्रातृत्वेन उल्लेखो वर्तते।

---

१. अष्टा.४.१.९५

२. पाणिनः मुनिः। पाणिनिः पणिनः पुत्रः। - काशकृत्स्नधातुव्याख्यानम्, १.२०६, ४८०

३. बाह्वादिभ्यश्च, अष्टा.४.१.९५

४. म.भा.१.१.५.२०

५. शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः। म.भा.२.३.३.६६

Scanned by CamScanner

पाणिनिना स्वशब्दानुशासने द्विधा बहुवचनान्तस्य "आचार्य" पदस्य निर्देशो विहितः[१]। श्रीहरदत्तमतानुसारेण पाणिनिः बहुवचनान्तेन "आचार्य"पदेन स्वगुरोः उल्लेखं करोति[२]। कथा-सरित्सागरग्रन्थानुसारेण पाणिनेः गुरोर्नाम "वर्ष" आसीत्।[३] वर्षस्य अनुज "उपवर्ष" आसीत्। एक उपवर्षो जैमिनीयसूत्राणां वृत्तिकार आसीत्।[४] एक उपवर्षो धर्मशास्त्रेष्वपि स्मृतोऽस्ति।[५] श्री पं.युधिष्ठिरमीमांसकमतानुसारेण जैमिनीयसूत्रवृत्तिकार उपवर्षो धर्मशास्त्रेषु स्मृत उपवर्षश्च एक एव। उपवर्षोऽयं जैमिनेः ईषदेव उत्तरकालिकः। अवन्तिसुन्दरीकथासारे वर्षोपवर्षयोस्तु उल्लेखोऽस्ति, परन्तु तत्र पाणिनेरुल्लेखो नास्ति। कथासरित्सागरस्य कथायाः ऐतिहासिकदृष्ट्या पूर्णतया प्रामाण्यं नास्ति, अतः पाणिनेराचार्यस्य नाम सन्दिग्धमस्ति। यदि कथासरित्सागरे स्मृत उपवर्षोऽपि प्राचीनजैमिनीयसूत्रवृत्तिकारेण, धर्मशास्त्रेषु स्मृतेनोपवर्षेण चाभिन्नो भवेत्, तस्यैव भ्राता वर्षो भवेत् तर्हि 'वर्षः' पाणिनेः गुरुरासीदिति स्वीकर्तुं शक्यते। महेश्वरोऽपि पाणिनेर्गुरुः आसीदित्यर्वाचीनाः वैयाकरणाः स्वीकुर्वन्ति। श्लोकात्मकपाणिनीयशिक्षानुसारेण पाणिनिना महेश्वरादक्षरसमाम्नायरूपाणां चतुर्दशसूत्राणामुपदेशं लब्ध्वा तदाधारेणैव स्वकीयः "अष्टाध्यायी" ग्रन्थो विरचितः[६]। स्कन्दपुराणानुसारेण गोपर्वते तपश्चर्यानन्तरं पाणिनिर्विशिष्टं

---

१. आदाचार्याणाम्, अष्टा.७.३.४९, दीर्घादाचार्याणाम्, अष्टा.८.४.५२

२. आचार्यस्य पाणिनेर्य आचार्यः स इहाचार्यः, गुरुत्वात् बहुवचनम्। प.म.भागः.२, पृ.८२१

३. अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्॥ क.स.सा.१.४.२०

४. शा.भा.१.१.५, कौ.सू.टी.पृ.३०७, प्र.ह.पृ.३८

५. वीरमित्रोदयः, संस्कारप्रकाशः, पृ.६१३-६६४

६. येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ पा.शि.

Scanned by CamScanner

ज्ञानं लब्धवान्।[1] हरचरितचिन्तामणिग्रन्थानुसारेण वर्षोपाध्यायशिष्यः सन्नपि यदा पाणिनिः स्वजडत्वकारणेन ज्ञातुं नाशकत्, तदा सः स्वजडत्वदूरीकरणाय हिमालयपर्वतं गत्वा तपश्चचार, भगवान् शङ्करश्च तस्मै व्याकरणशास्त्रमुपदिदेश।[2]

**※ पाणिनेः शिष्यपरम्परा**

"उपसेदिवान् कौत्सः पाणिनिम्" इति महाभाष्योक्त[3] उदाहरणात्, "अनूषिवान् कौत्सः पाणिनिम्, उपशुश्रुवान् कौत्सः पाणिनिम्" इति काशिकोक्त[4] उदाहरणाज्ज्ञायते यत् पाणिनेः कश्चन कौत्सनामा शिष्यः आसीत्।

**※ पाणिनेर्निवासस्थानम्**

शालातुरीयत्वादयं पाणिनिः 'शालातुरीयः' प्रोच्यते। जैनलेखको वर्धमानो गुणरत्न-महोदधौ शालातुरीयशब्दस्य व्युत्पत्तिमेवं प्रदर्शितवान् - "शलातुरो नाम ग्रामः, सोऽभिजनो-ऽस्याऽस्तीति शालातुरीयः, तत्र भवान् पाणिनिः।"[5]

अर्थात् शलातुरो ग्रामः पाणिनेरभिजन आसीत्। पाणिनिना हि - **तूदीशलातुरवर्म-तोकूचवाराड्ढक्छण्ढञ्यकः**[6] इति सूत्रे साक्षात् 'शलातुर' पदं पठित्वा अभिजनेऽर्थे शाला-

---

१. गोपर्वतमिदं स्थानं शम्भोः प्रख्यापितं पुरा।
यत्र पाणिनिना लेभे वैयाकरणिकाग्रता॥ स्क.पु.२.६८

२. ह.चि.१७.७३-७४

३. म.भा.३.२.१.१०८

४. का.वृ.३.२.१०८

५. ग.र.म.पृ.१

६. अष्टा.४.३.९४

Scanned by CamScanner

तुरीयपदस्य सिद्धिः प्रदर्शिता। व्याकरणमहाभाष्ये अभिजननिवासयोर्भेदः प्रदर्शितो वर्तते। तथा हि - **अभिजनो नाम यत्र पूर्वैरुषितम्, निवासो नाम यत्र सम्प्रत्युष्यते।**[१]

एतल्लक्षणानुसारं शलातुरः पाणिनेः पूर्वजानां वासस्थानम्, पाणिनिः स्वयं कुत्रचिदन्यत्र वसति स्म। पुरा तत्त्वविदां मतानुसारेण पश्चिमोत्तरसीमप्रान्तस्थस्याऽटकस्य समीपवर्ती वर्तमानो **लाहुरग्रामः** प्राचीनः शलातुरोऽस्ति, यः पाणिनेः पूर्वजानां वासस्थानमासीत्। पाणिनेराचार्यस्य **उदक् च विपाशः**,[२] **वाहीक ग्रामेभ्यश्च**[३] इत्यादि सूत्रस्थभाष्यात् प्रतीयते यत् पाणिनिर्विशेषरूपेण वाहीकदेशेन परिचित आसीत्। अतः पाणिनिर्वाहीकदेशस्य तत्समीपस्य वा निवासी भवति।

### ❊ पाणिनेः मृत्युः

आचार्यस्य पाणिनेः अन्यज्जीवनस्येतिवृत्तं किमपि नोपलभ्यते, किन्तु पञ्चतन्त्रे मित्रसम्प्राप्तौ प्रसङ्गतः कस्माच्चित् प्राचीनग्रन्थात् पद्यमेकमुद्धृतमस्ति, यत्र पाणिनेः, जैमिनेः, पिङ्गलस्य च मृत्युकारणानामुल्लेखो वर्तते। तथाहि -

> **सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः**
> **मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।**
> **छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलं**
> **अज्ञानावृतचेतसां मतिरुषां कोऽर्थस्तिरश्चां गुणैः॥**[४]

---

१. म.भा.४.३.१.९०

तुलनीयम् - यत्र सम्प्रत्युष्यते स निवासः, यत्र पूर्वैरुषिम् सोऽभिजनः॥ का.वृ.४.३.९०

२. अष्टा.४.२.७४ ३. अष्टा.४.२.११७ ४. प.त.मि.सं.३६

Scanned by CamScanner

एतेन पाणिनिं कश्चन सिंहो जघान, मृत्युश्च तस्य त्रयोदश्यां तिथावेवाभूदिति प्रतीयते। अत एव काश्यादिषु वैयाकरणैः मासस्यानिश्चयात् प्रतित्रयोदशि अनध्ययनतिथित्वेन व्यवह्रियते।

## ❊ पाणिनेः कालः

भारतीयप्राचीनार्षवाङ्मयं, तस्य अतिप्राचीनमितिहासश्चाधिकाधिक- रूपेणार्वाचीनं साधयितुं बद्धपरिकरैः पाश्चात्यैः विद्वद्भिः पाणिनेः कालः सप्तम ईशवीय- पूर्वशतकात् चतुर्थेशवीयपूर्वशतकम् अर्थात् ६५७ वैक्रमाब्दपूर्वात् २५८ वैक्रमाब्द पूर्वं यावत् स्वीकृतः।

पूर्वसीमा गोल्डस्टुकरमहोदयस्याऽस्ति, अन्तिमा सीमा च बैबरकीथमहोदयाभ्यां स्वीकृताऽस्ति। प्राचीनभारतीयेतिहासविषये प्रसिद्धानां पाश्चात्यमतानां मूलाधारः सिकन्दर-चन्द्रगुप्तमौर्ययोः[१] काल्पनिकी समकालिकत्वस्वीकृतिरेव। पाणिनेराचार्यस्य कालनिर्धारणे पाश्चात्यैः तदनुयायिभिः भारतीयैश्च विद्वद्भिः समुपस्थापितेषु प्रमाणेष्वधोलिखितान्येव मुख्यानि -

१. आर्यामञ्जुश्रीमूलकल्पग्रन्थे लिखितं यत् - महापद्मस्य नन्दस्य सखा **पाणिनिर्नाम** एको माणव आसीत्।[२]

२. कथासरित्सागरे पाणिनिर्महाराजस्य नन्दस्य समकालिक उक्तः।[३]

---

१. सिकन्दर का आक्रमण चन्द्रगुप्त मौर्य के समय नहीं हुआ। इन दोनों की समकालीनता भ्रममूलक है। मौगस्थनीज के अवशिष्ट इतिवृत्त से भी इनकी समकालीनता कथञ्चित् भी सिद्ध नहीं होती, अपि तु इसका विरोध विस्पष्ट है। - भगवद्दत्तजीकृत भारतवर्ष का बृहद् इतिहास, भाग.१, पृ.२८८-२९६.

२. तस्याऽप्यन्यतमः सख्यः पाणिनिर्नाम माणवः॥ आर्यमञ्जुश्रीमूलकल्पः

३. क.स.सा.१.४

Scanned by CamScanner

३. बौद्धभिक्षूणां कृते प्रयुज्यमानस्य श्रमणशब्दस्य निर्देशः पाणिनेः **कुमारः श्रमणादिभिः**[१] इति सूत्रे समुपलभ्यते।

४. बुद्धकालिकस्य मंखलि गोसाल इत्यभिधेयकार्यस्य आचार्यस्य कृते प्रयुक्तस्य संस्कृत-भाषायाः मस्करी शब्दस्य साधुत्वं पाणिनिना **मस्करमस्करिणौ वेणुपरिव्राजकयोः**[२] इति सूत्रे प्रदर्शितम्।

५. अष्टाध्याय्याः **इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणा-मानुक्**[३] इति सूत्रे यवन शब्दः पठितः। एतदेवाश्रित्य श्रीकीथमहोदयेन लिखितं यत् पाणिनिः सिकन्दरस्य भारतवर्षे आक्रमणानन्तरं सम्बभूव।

६. राजशेखरेण काव्यमीमांसायां यस्यानुश्रुतेः उल्लेखो विहितः तदनुसारेण पाटलिपुत्रे सम्पन्नायां शास्त्रकारपरीक्षायामुत्तीर्णा भूत्वा वर्षोपवर्षपाणिनिपिङ्गलादिभिः यशोऽर्जितम्[४] पाटलिपुत्रस्य स्थापना उदयी नामधेयेन महाराजेन विहिताऽसीत्।[५]

पाणिनेः कालविषये श्री पं.वाचस्पतिगैरोला महोदयेन संस्कृत साहित्य का इतिहास इत्यभिधेये स्वग्रन्थे केषाञ्चित् प्रसिद्धानां प्राच्यानां पाश्चात्यानाञ्च मतानां सङ्कलनमधो-लिखितप्रकारेण विहितम्[६] -

---

१. अष्टा.५.१.७०
२. अष्टा.६.१.१५४
३. अष्टा.४.१.४९
४. श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा -
अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः।
वररुचिपतञ्जली अह परीक्षिताः ख्यातिमुपचग्मुः॥ का.मी.१०
५. वा.पु.९९.३१८
६. सं.सा.इ.पृ.६६३

Scanned by CamScanner

१. पं. सत्यव्रत सामश्रमी - २४०० ईशवीयपूर्वम्।

२. श्री राजवाडे तथा श्री वैद्यनाथपायगुण्डे - ९०० ईशवीयपूर्वतः ८०० ईशवीयपूर्वम्।

३. मैकडोनल - ५०० ईशवीयपूर्वम्।

४. एफ.मैक्समूलर् - ३५० ईशवीयपूर्वम्।

५. कीथ - ३०० ईशवीयपूर्वम्।

६. डॉ. वासुदेवशरण अग्रवाल[१] - ईशवीयपूर्वपञ्चमशतकस्य मध्यभागः।

परन्तु श्री पण्डितयुधिष्ठिर मीमांसकमहोदयेन **संस्कृतव्याकरणशास्त्र का इतिहास** इत्यभिधेये स्वग्रन्थे अनेकैः प्रमाणैः साधितं यत् स्थूलतया पाणिनेः आचार्यस्य कालो वैक्रमाब्दोदकोनत्रिंशच्छतवर्षपूर्वमस्ति। श्रीमीमांसकमहोदयेन उपस्थापितानि प्रमाणानि अधो लिखितानि -

१. गृहपतिः शौनकः ऋक्प्रातिशाख्ये[२] बृहद्देवताग्रन्थे[३] च बहुधा यास्कस्योल्लेखं करोति।

२. पाणिनेरनुजः पिङ्गल **उरोबृहती यास्कस्य**[४] इतिसूत्रे यास्कं स्मरति।

३. यास्कस्य निरुक्ते[५] कौत्सस्योल्लेखोऽस्ति। पातञ्जलमहाभाष्यानुसारेण[६] कौत्सः पाणिनेः शिष्य आसीत्।

---

१. India as known to Panini

२. न दासतय्येकपदा काचिदस्तीति वै यास्कः॥ ऋ.प्रा.१.७.४२

३. बृहद्देवता - १.२६, २.१२२,१३२,१३७, ३.७६,१००,११२ इत्यादि

४. छ.शा.३.३०

५. यदि मन्त्रार्थप्रत्यया, अनर्थकं भवतीति कौत्सः। अनर्थका हि मन्त्राः॥ निरु.१.५

६. उपसेदिवान् कौत्सः पाणिनिम्। म.भा.३.१.१०८

Scanned by CamScanner

४. यास्काचार्येण स्वतैत्तिरीयानुक्रमणिकायाम् ऋक्प्रातिशाख्यप्रवक्तुः शौनकस्योल्लेखो विहितः।[1]

५. पिङ्गलस्य नाम पाणिनीयगणपाठे[2] समुपलभ्यते।

६. पाणिनिना **शौनकादिभ्यश्छन्दसि**[3] इति सूत्रे शौकनस्योल्लेखो विहितः।

७. शौनकशाखाप्रवक्ता गृहपतिः शौनकः ऋक्प्रातिशाख्ये व्याडेरुल्लेखं करोति।[4] व्याडेर्नाम दाक्षायणोऽप्यासीत्। सः पाणिनेर्मातुल आसीत्।

८. 'व्याडिर्दाक्षायणश्चेति'[5] नामद्वयं पाणिनीयगणपाठे समुपलभ्यते।

९. सामवेदीयलघुऋक्तन्त्रव्याकरणे पाणिनेः साक्षादुल्लेख उपलभ्यते।[7]

१०. बौधायनश्रौतसूत्रग्रन्थस्य प्रवराध्याये पाणिनेः साक्षादुल्लेख उपलभ्यते।[8]

११. मत्स्यपुराणे[9] पाणिनिगोत्रस्योल्लेखोऽस्ति।

१२. वायुपुराणे[10] पाणिनगोत्रस्य निर्देश उपलभ्यते। पाणिनिपाणिनयोरैक्यं त्वस्त्येव।

१३. ब्रह्मवैवर्तपुराणे[11] पाणिनिः साक्षाद् ग्रन्थकार उक्तः।

---

१. द्वादशनिस्त्रयोऽष्टाक्षरांश्च जगती ज्योतिष्मी। सापि त्रिष्टुबिति शौनकः॥ वै.वा.इ.पृ.२०५

२. पाणिनीयगणपाठः, ४.१.९९, १०५

३. अष्टा.१.४.१०९

४. ऋ.प्रा.२.२३,२७, ६.४३, १३.३१,३७

५. पाणिनीयगणपाठः, ४.१.८०

६. तदेव, ४.२.५४

७. एचोवृद्धिरिति प्रोक्तं पाणिनीयानुसारिभिः। (सामवेदीयं लघु ऋक्तन्त्रव्याकरणम्, पृ.४६१)

८. भृगूणामेवादितो व्याख्यास्यामः .... पैङ्गलायनाः बैहीनयः .... काशकृत्स्नः .... पाणिनि ...... वाल्मीकि ...... आपिशलयः। बौ.श्रौ.सू.३

९. पाणिनिश्चैव त्र्यार्षेयाः सर्व एते प्रकीर्तिताः॥ म.पु.१९७.१०

१०. बभ्रव पाणिनश्चैव। धानञ्जप्यास्तथैव च॥ वा.पु.९१.९९

११. कणादो गौतमः कण्वः पाणिनि शाकटायनः।
ग्रन्थं चकार ...........................॥ ब्र.वै.पु.प्रकृतिखण्डम्, ४.६७

Scanned by CamScanner

उपर्युक्तप्रमाणैः ज्ञायते यत् यास्क-शौनक-व्याडि-पाणिनि-पिङ्गल-कौत्सादयः समकालिका एव। एषु शौनकस्य कालः सामान्यतया भारतयुद्धात् महारास्याऽधिसीमस्य कालं यावदस्ति, तस्यायुः वर्षशतत्रयमासीत्। ऋक्प्रातिशाख्यप्रणयनं महाभारतयुद्धात् प्रायः शतवर्षानन्तरम्, अर्थात् विक्रमपूर्वत्रिसहस्रवर्षेऽभूत्। ऋक्प्रातिशाख्ये स्मृतो व्याडिर्यः पाणिनेर्मातुल आसीत् एतत्कालिक एवाऽस्ति। अतः पाणिन्याचार्यस्य कालः स्थूलतया वैक्रमाब्दादेकोनत्रिंशच्छतवर्षपूर्वमासीदिति सिद्ध्यति।

अयं च पाणिनिः व्याकरणशास्त्रस्यादिमः प्रवक्तोति युधिष्ठिरमीमांसकस्य मतम्। यद्यपि पाणिनेः पूर्वमपि सन्त्यन्यानि व्याकरणानि। तथापि न तैराचार्यैर्न सम्पूर्णं व्याकरणं विरचितम्। तत्तत्भागानामेव तैः विवरणं कृतम्। परन्तु पाणिनिः लौकिकान् वैदिकान्श्च प्रयोगान् सप्रमाणं साधयन् सम्पूर्णं शास्त्रम् **अष्टाध्यायी** रूपेण सूत्रपद्धत्या प्राचीकशत्। अत एव मन्ये पाणिनिरेव व्याकरणशास्त्रस्यास्य प्रथमः प्रवक्ता इति वदन्ति। **उपज्ञोपक्रमं तदाद्याचिख्यासायाम्**[१] इति सूत्रे पाणिन्युपज्ञं व्याकरणमित्युदाहृतं दीक्षितेन।

पाणिनीयव्याकरणस्य सूक्ष्मतया पर्यवेक्षणेन प्रतीयते यत् पाणिनिः न केवलं शब्दशास्त्रमात्रस्यैव परिज्ञाता आसीत्, अपितु समस्तस्य प्राचीनवाङ्मयस्य भूगोल इतिहास मुद्रशास्त्र लोकव्यवहारादीनाञ्चाऽप्यद्भुतो विद्वानासीत्। स हि प्राचीनार्वाचीनयोः कालयोः सम्बन्धयिता एकः सेतुरिव भाति। पाणिनिना अष्टाध्याय्यामापिशलिशाकटायनप्रभृतयः स्वप्राक्तना आचार्याः स्मृताः।

---

१. अष्टा.२.४.२१

Scanned by CamScanner

## ❋ पाणिनेः कृतयः

संस्कृतव्याकरण इतिहासपरिशीलनेन ज्ञायते यत् पाणिनिना अधो लिखिताः ग्रन्थाः प्रणीताः - १. अष्टाध्यायी, २. शिक्षा, ३. द्विरूपकोशः, ४. धातुपाठः, ५. गणपाठः, ६.लिङ्गानुशासनम्, ७. जाम्बवती विजय(पातालविजय)महाकाव्यम्,[१] ८.अष्टाध्यायाः स्वोपज्ञवृत्तिः।

## ❋ पाणिनीयव्याकरणस्वरूपं, तद्वैशिष्ट्यञ्च

पाणिनेरष्टाध्यायी सर्वाङ्गपूर्णा कृतिः, यस्यां लौकिकवैदिकोभयविधशब्दसिद्धये नियमनिर्देशाऽपूर्वाः सर्वसामान्यश्चाभूवन्। मैकडाँनलमहोदयः पाणिनीयं व्याकरणमुद्दिश्य पाणिनीयं व्याकरणं प्रशंसन् कथयति यत् पाणिनीयं व्याकरणं स्वनीतिनियमकारणेनेयतीं ख्यातिमार्जयद् यदाधारेण वक्तुं शक्यते - यत् भारतीयव्याकरणे विश्वस्मिन् सर्वप्रथमं शब्दानां वैज्ञानिकं विवेचनं जातं, प्रकृतिप्रत्ययोर्भेदपरिचयो जातः, शब्दसिद्धिप्रकारनिर्द्धारणं निश्चितं, सार्वजनीन सर्वाङ्गीण विशुद्धायाः पद्धतेः निर्माणमजायत, यस्य तुलना विश्वस्य केनापि व्याकरणेन न कर्तुं शक्यते[२] इति।

Scanned by CamScanner

Hunter) कथयति यत् - **विश्वव्याकरणेषु पाणिनीयव्याकरणं शेखरीभूतमस्ति। तस्य वर्णशुद्धता, भाषायाः धात्वव्ययसिद्धान्तः, प्रयोगविधयश्च अद्वितीया अपूर्वाश्च।**[१] रूसदेशस्य लेनिनग्रादनगरीयेण श्री प्रो.त.शेरवात्सकी (T.Shervatskii) महोदयेन पाणीनीय-व्याकरणविषये उक्तं यत् - **पाणिनीयव्याकरणं सर्वोत्कृष्टकृतिष्वेकमस्ति।**[२]

सुप्रसिद्धेन आधुनिकभाषावैज्ञानिकेन ब्लूमफील्डमहोदयेनोक्तम् - Generations of such labour must have preceded the oldest treatise that has come down to us, the grammar of Panini. This grammar, which dates from somewhere around 350 to 250 B.C., is one of the greatest monuments of human intelligence.[३]

अर्थात् अनेकेषां वंशानामेतादृशपरिश्रमेणास्माभिः प्राचीनतमं व्याकरणं पाणिनीयं व्याकरणमुपलब्धं व्याकरणमिदम्, यस्य रचनाकालः ३५० ईशवीयपूर्वतः २५० ईशवीयपूर्वं भवितुमर्हति, मानवबुद्धिमत्तायाः महत्तमासु कृतिष्वेका।

**❋ वार्तिककार आचार्यः कात्यायनः**

**उक्तानुक्तादुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिण॥**[४]

इति लक्षणलक्षितस्य वार्तिकस्य कर्तृत्वेन स्मृतोऽयं कात्यायननामको दाक्षिणात्यो महान् वैयाकरणो मुनित्रितये प्राधान्यं भजमानः सूर्य इव व्याकरणाकाशे दृश्यते। भर्तृहरि- कुमारिल-

---

१. महान् भारत, पृ.१५०
२. हिन्दुस्तान की कहानी, पृ.१९१
३. Leyonard Blookfield - Language, P.11
४. पराशरोपपुराणम्

Scanned by CamScanner

क्षीरस्वामी - हेलराज- सायण- पतञ्जलि- नागेशप्रभृतिभिः वाक्यकारपदेनाप्ययं व्यवह्रियते। अनेन पाणिनीय अष्टाध्यायीसूत्राण्याधारीकृत्यानेकानि वार्तिकानि लिखितानि। महाभाष्ये यान्यनपेक्षितानि वार्तिकानि, तानि प्रायशो खण्डितानि महाभाष्यकारेण।

अस्य पर्यायतया नामानि - कात्यः, कात्यायनः, पुनर्वसुः, मेघजित्, वररुचिः इत्यादीनि संस्कृतव्याकरणशास्त्रेतिहासे उट्टङ्कितानि तत्प्रणेतृभिः श्री पं.युधिष्ठिरमीमांसकमहोदयैः। तत्र कात्येति नाम गोत्रप्रत्ययान्तम्। कात्यायन इति नाम युवप्रत्ययान्तम्। पुनर्वसु इति नक्षत्रं नाम। वररुचीति नाम सर्वथा बहुषु स्थलेषु विशेषतो महाराज समुद्रगुप्तस्य कृष्णचरिते स्वर्गा-रोहणकाव्यस्य कर्तृत्वेन स्मृतः। अयमेव पाणिनीयसूत्रवार्तिककारः कात्यायनः। कथा-सरित्सागरे (१.२.६६-७०) बृहत्कथामञ्जर्याञ्च कात्यायनस्य 'श्रुतधर' इति नामाप्युपलभ्यते। कात्यायनः इति नाम्ना बहवः पुरुषाः संस्कृतवाङ्मये ऐतिहासिकदृष्ट्या कौशिककात्यायन-आङ्गिककात्यायन-भार्गवकात्यायन-याज्ञवल्कस्यपुत्र कात्यायनेत्यादयः प्रसिद्धाः सन्ति।

महाभाष्ये पस्पशाह्निके यथा- लौकिकवैदिकेषु इति वार्तिके लौकिकवैदिक इति प्रयोगात् - **प्रियद्धिताः दाक्षिणात्याः। यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिक-वैदिकेषु इति प्रयुञ्जते**[१] इति कथने दाक्षिणात्योऽयं ब्राह्मण इति ज्ञायते। कथासरि-त्सागरानुसारं कात्यायनः कौशाम्बी निवासी आसीत्। महामुनिना पतञ्जलिना **प्रोवाच भगनांस्तु कात्य**[२] इति वचनेन वार्तिककारस्य प्रामाणिकता सुस्पष्टीकृता। न्यासकारेण जिनेन्द्रबुद्धिपादेनाऽपि -

१. म.भा.१.१.१
२. म.भा.३.२.३

Scanned by CamScanner

**एतच्च कात्यायनप्रभृतीनाम्प्रमाणभूतानां वचनाद्विज्ञायते।**[1]

**कात्यायनवचनप्रामाण्याद् धातुच वेदितव्यम्।**[2]

इति वाक्याभ्यां वार्तिककारस्य सर्वथा प्रामाण्यमुररीकृतम्।

❊ **कालः**

वार्तिककारः कात्यायनो यदि याज्ञवल्क्यपौत्रः स्वीक्रियते तर्हि सः पाणिन्यपेक्षया किञ्चिदुत्तरवर्ती भविष्यति। यदि सः पाणिनेः साक्षाच्छिष्य आसीत् तर्हि सः पाणिनेः सम-कालिकः। अतः वार्तिककारस्य कात्यायनस्य कालः विक्रमसंवत्सरात् प्रायशः २९०० - ३००० (एकोनत्रिंशत् - त्रिंशश्शतम्) शतवर्षपूर्वमेव भवितुमर्हतीति श्री पं.युधिष्ठिरमीमां-सकानाम्मतम्।

❊ **कृतयः**

भगवता कात्यायनेन "यथोत्तरं मुनीनां प्रामाण्यम्" इति वैयाकरणप्रसिद्धवाक्यानुसारं पाणिन्यपेक्षया प्रामाण्यमधिगतम्। एतस्य मुख्यं कृत्यम् - अष्टाध्याय्याः सूत्राण्याधारीकृत्य वार्तिकपाठात्मकग्रन्थस्वरूपम्। कात्यायनीयवार्तिकपाठः पाणिनीयव्याकरणस्य महत्त्वपूर्ण-मङ्गम्। पतञ्जलिनाऽप्येतदीय वार्तिकान्याधारीकृत्य स्वकीयं महाभाष्यं प्रणीतम्। सम्पूर्णः खलु वार्तिकपाठः सम्प्रति नोपलभ्यते, अतः संख्या तेषां न निश्चेतुं शक्यते। कात्यायनस्य प्रथमवार्तिकविषये विद्वत्सु वैमत्यमवलोक्यते। केचन **सिद्धे शब्दार्थसम्बन्धे** इति वार्तिकं

---

१. जिनेन्द्रबुद्धिः - न्यासः, ६.३.५०, भागः.२., पृ.४५३-४५४

२. तदेव.३.१.३५, भागः.१, पृ.५२७

Scanned by CamScanner

कात्यायनस्य प्रथमवार्तिकं मन्यन्ते। महाभाष्ये उक्तम् - **माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते**[१] इति।

अत्र आदि पदं न मुख्यार्थवाचकम्, अतः **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्** इत्येवं प्रथमं वार्तिकमिति श्री पण्डित युधिष्ठिरमीमांसकानाम्मतम्। तत्र प्रमाणानि -

१. सायणाचार्येण स्वऋग्भाष्योपोद्घाते उक्तम् - **तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्तिके दर्शितः - रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति। एतानि रक्षादीनि प्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टीकृतानि।**[२]

२. व्याकरणाध्ययनप्रयोजनान्यन्वाख्यायता पतञ्जलिनोक्तम् - **एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे। इमानि प्रयोजनान्यध्येयं व्याकरणमिति।**[३] अत्र 'आचार्य' पदं कात्यायनवाचकम् "इदं शास्त्रम्" इति प्रयोजनान्वाख्यातं शास्त्रमेव। "रक्षोहागम" इति व्याकरणाध्ययनप्रयोजननिर्देशकवाक्यं वार्तिककारस्य न स्वीक्रियेत चेत्, तर्हि 'आचार्य' पदं भाष्यकारेणात्मने प्रयुक्तमिति शङ्का समुदेति।

३. रक्षोहागमप्रभृतीति पञ्चप्रयोजनानि व्याख्याय महाभाष्यकारेण इमानि च भूयः इति वाक्येन त्रयोदशप्रयोजनानि व्याख्यातानि।

अतः रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति वार्तिकमेव प्रथमं वार्तिकं कात्यायनस्येति स्वीकर्तव्यम्। कात्यायनस्य द्वितीया खलु कृतिः स्वर्गारोहणकाव्यम्, यच्च वररुचिकाव्यपदे-

---

१. म.भा.१.१.१

२. ऋ.भा.उपोद्घातः

३. म.भा.१.१.१

Scanned by CamScanner

नोल्लिख्यते। वररुचिरिति कात्यायनस्य अपरं नाम। महाराजसमुद्रगुप्तेन कृष्णचरिताख्ये मुनि-कविवर्णने उक्तम् -

**यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।**

**काव्येनाऽनुचिरेणैव ख्यातो वररुचिः कविः ।।**

**न केवलं व्याकरणं पुपोष दाक्षीसुतस्येरितवार्तिकैर्यः।**

**काव्येऽपि भूयोऽनुचकार तं वै कात्यायनोऽसौ कविकर्मदक्षः ।।**

राजशेखरेणाऽप्युक्तम् -

**यथार्थता कथं नाम्नि मा भूद् वररुचेरिह।**

**व्यधत्त कण्ठाभरणं यः स्वर्गारोहणप्रियः ।।**

इति वचनेनापि कात्यायनस्य पूर्वं काव्यकर्तृत्वं प्रसिद्ध्यति। भ्राजा नाम श्लोका अपि वार्तिक कारस्य रचनेति कैयट-हरदत्त-नागेशभट्टादिभिर्मन्यन्ते। **यस्तु प्रयुङ्क्ते कुशलो विशेषे** इत्यादयो महाभाष्यस्थाः श्लोकाः भ्रजश्लोकसंग्रहस्था एव। अयं कात्यायनः अनेकशास्त्र-वेत्तेति प्रतीयते। कात्यायनस्य अपरा कृतिश्छन्दःशास्त्रमिति। कात्यायनस्मृतिरप्युपलभ्यते। मद्रासविश्वविद्यालयप्रकाशितः **उभयसारिका भाण** इति ग्रन्थोऽपि कात्यायनस्येति केचन मन्यन्ते, परन्तु सः वार्तिककार कात्यायनस्य नैवेति श्री पं.युधिष्ठिरमीमांसकानाम्मतम्।

**❊ पतञ्जलिः**

गोनर्ददेशे गोणिकानाम्नी सूर्योपासिका भगवते सूर्यायैकदाऽर्घ्यं ददाति स्म। तदा तस्याः अञ्जलेः आदिशेषः पपात। स एव पतञ्जलिः। पतन्तोऽञ्जलयोर्यस्मिन्निति व्युत्पत्त्या

Scanned by CamScanner

पतञ्जलिः सर्वैर्नमस्कार्यः इत्यर्थः। शङ्खचक्रादिचिह्नितः, बाहुपर्यन्तं मनुष्याकारः सहस्रफण-विशिष्टश्चायमिति ऐतिह्यम्।

गच्छतिकाले व्याडिमहर्षिणा विरचितः सङ्ग्रहो नष्टप्रायो बभूव। यथोक्तं वाक्यपदीये-

**प्रायेण संक्षेपरूपो नाल्पविद्यापरिग्रहान्।**

**सम्प्राप्य वैयाकरणान् सङ्ग्रहेऽस्तमुपागते॥** इति।

वैयाकरणाः किञ्चिन्मात्रं व्याकरणमधीत्य तावताऽऽत्मनश्चरितार्थं मेनिरे। लोके प्रायः सर्वोऽपि मनुष्यो लाघवमपेक्षते। क्लेशं तु न सहते। अतः कारणात् नाशमुपागतः सङ्ग्रहः।

तस्मिन् समये भगवान् पतञ्जलिः सङ्ग्रहस्य व्याख्यानरूपेण भाष्यं विरचयामास। पतञ्जलेर्गोनर्दीयः[१], गोणिकापुत्रः[२], नागनाथ[३] इति च नामान्तराणि। पाणिनिसूत्राणां कात्यायन-वार्तिकानाञ्च व्याख्यानरूपेण भाष्यं निरमायि। सङ्ग्रहग्रन्थस्था अपि विषयाः क्वचित्स्थले प्रतिपादिताः।

### ❋ व्याडिः

व्यडस्य पुत्रोऽयं व्याडिः।[४] अस्यैव विन्ध्यस्थः, नन्दिनीसुतः, मेधावी इति च नामा-न्तराणि।[५] विन्ध्यस्थ इत्यनेन विन्ध्यपर्वतनिवासित्व, नन्दिनीसुत इत्यनेन माताऽस्य नन्दिनीति

---

१. म.भा.(नवाह्निकं छायासहितम्), पृ.९८

२. म.भा.प्रथमोऽध्यायः, पृ.३९६, उभयता - गोणिकापुत्रः

३. म.भा. कैयटे तु, पृ.४३०

४. सं.व्या.इ.पृ.२७७

५. तत्रैव.पृ.२७५

Scanned by CamScanner

च स्पष्टमेव। व्याडीन्द्रदत्तौ वर्षस्य गुरोः प्राप्तौ निकेतनम् इति श्लोकार्धेन[1] व्याडेः गुरुचरणाः वर्षोपाध्याया इति ज्ञायते।

**सकृच्छ्रुतं वररुचिर्व्याडिश्च द्विःश्रुतं वचः।**

**त्रिः श्रुतं चेन्द्रदत्तः स जग्राह गुरुणोदितम्।।**[2]

इति श्लोकेन चायं द्विःश्रुतग्राहीति स्पष्टमेव।

महर्षिरयम् अष्टाध्याय्या व्याख्यानरूपेण सङ्ग्रहनामकं बृहद्ग्रन्थं रचयामास। स च ग्रन्थो लक्षश्लोकात्मकः।[3] **सङ्ग्रह एतत्प्राधान्येन परीक्षितम्** इत्यनेन वचनेन[4] भगवता पतञ्जलिना स्मृतोऽयं ग्रन्थः। **द्रव्याभिधानं व्याडिः**[5] इति भाष्यवचनेन च व्याडेः स्मरणं दृश्यते।

**रसाचार्यः कविर्व्याडिः शब्दब्रह्मैकवाङ्मुनिः।**

**दाक्षीपुत्रवचो व्याख्या पटुर्मीमांसकाग्रणीः।।**

**बालचरितं कृत्वा यो जिगाय भारतं व्यासं च।**

**महाकाव्यनिर्माणे तन्मार्गस्य प्रदीपमिव।।**[6]

इति श्लोकाभ्यां व्याडिः महर्षिः न केवलं सङ्ग्रहकर्ताऽपि तु अलङ्कारशास्त्रे मीमांसाशास्त्रे च महान् निष्णातः इति बलरामस्य चरितमाधृत्य **बालचरितं** नामकं काव्यमपि प्रणिनायेति च ज्ञायते।

---

१. म.भा.(नवाह्निकं छायासहितम्), हरचरितचिन्तामणिः. ६५, पृ.२३

२. तत्रैव. श्लो.६९, पृ.२

३,४. तत्रैव, पस्पसाह्निके, उद्योते, पृ.५७

५. म.भा.द्वितीयोऽध्यायः, पृ.१३१

६. सं.व्या.इ.पृ.२८०

Scanned by CamScanner

## ❊ भर्तृहरिः

भगवतो वसुरातस्य शिष्योऽयं भर्तृहरिः। भर्तृहरिविषये वात्र [illegible] धी महाभाष्यगूढार्थान् स मेधाविने धनवते चास्मै ददौ। आचार्योपदिष्टमागमसङ्ग्रहं प्राप्य लोके तं चिरस्थायिनं सङ्कल्प्य वाक्यपदीयं विरचयामास। महाभाष्यस्य श्लोकरूपं व्याख्यानमिदम्। पतञ्जलिमहर्षिप्रदर्शितानि न्यायबीजानि विस्तृततया अत्र प्रत्यपाद्यन्त।

## ❊ वाक्यपदीयस्वरूपम्

१. ब्रह्मकाण्डम्, २. वाक्यकाण्डम्, ३. पदकाण्डमिति काण्ड - त्रयात्मकोऽयं ग्रन्थः। पुण्यपत्तनात् प्रकाशितवाक्यपदीयमूलग्रन्थानुसारं कारिकाणां संख्या-

---

१. वा.प.(वाक्यकाण्डम्), कारिका.४८२, पृ.५२२

२. सं.व्या.इ.पृ.३४१

Scanned by CamScanner

| | | |
|---|---|---|
| १. ब्रह्मकाण्डम् | - | १५५ |
| २. वाक्यकाण्डम् | - | ४८५ |
| ३. पदकाण्डम् | - | १३२३ |
| आहत्य | | २५६३ कारिकाः। |

ब्रह्मकाण्डे स्फोटात्मकशब्दो निर्गुणब्रह्मरूपतया वर्णितः। वाक्यकाण्डे वाक्य-विभागोऽन्ततो वाक्यस्याखण्डत्वमित्यादयोंऽशाः प्रतिपादिताः। पदकाण्डे चापोद्धारपद्धत्या पदविभागपुरस्सरं पदार्थनिर्णयोऽकारि। चतुर्दशसमुद्देशाः सन्त्यत्र। ते च -

| | |
|---|---|
| १. जातिसमुद्देशः | २. द्रव्यसमुद्देशः |
| ३. सम्बन्धसमुद्देशः | ४. भूयोद्रव्यसमुद्देशः |
| ५. गुणसमुद्देशः | ६. दिक्समुद्देशः |
| ७. साधनसमुद्देशः | ८. क्रियासमुद्देशः |
| ९. कालसमुद्देशः | १०. पुरुषसमुद्देशः |
| ११. संख्यासमुद्देशः | १२. उपग्रहसमुद्देशः |
| १३. लिङ्गसमुद्देशः | १४. वृत्तिसमुद्देशः इति। |

तत्तदवसरेषु दर्शनान्तरीयाणां मतान्यत्र निरूपितानि। अतएव सर्वेऽपि शास्त्रज्ञा वाक्य-पदीयं स्वमतोपष्टम्भकतया प्रदर्शयन्ति। यथा शब्दशक्तिप्रकाशिकायाम् -

**हन्तेः कर्मण्युपष्टम्भात् प्राप्तुमर्थे तु सप्तमीम्।**

**चतुर्थी बाधिकमाहुश्चूर्णि-भागुरि-वाग्भटाः॥**[1]

१. श.श.प्र. (कारकेषूपपदविभक्तिप्रकरणम्), पृ.३८९

Scanned by CamScanner

### ❊ पुण्यराजः

अस्य पुञ्जराज इत्यपि व्यवहारः। भर्तृहरिविरचितावाक्यपदीये ब्रह्मवाक्यकाण्डयोरनेन व्याख्या व्यधायि। अयं विक्रमीय १२ शताब्दिकालिकः।[1]

### ❊ हेलाराजः

काश्मीरदेशाधिपतेर्मुक्तापीडस्य मन्त्री लक्ष्मणः। तस्य वंशे भूतिराजस्य पुत्रोऽयं हेलाराजः।[2] अनेन वाक्यपदीये पदकाण्डस्य प्रकाशनाम्नी व्याख्या व्यरचि। अस्य कालः विक्रमीय एकादशशताब्दः। वाक्यपदीये काण्डत्रयस्यापि अनेन व्याख्यानं विरचितमित्यपि प्रवादोऽस्ति।

### ❊ कैयटः

जैयटस्य पुत्रोऽयं कैयटः।[3] भर्तृहरिप्रणीतवाक्यपदीयाधारेण पतञ्जलिमहाभाष्यं प्रतीकधारणपुरस्सरं प्रदीपटीकया व्याचख्यौ। प्रदीपेनैव महाभाष्यार्थः सुगृहीतो भवति। प्रदीपाभावे कः पूर्वपक्षः, को वा सिद्धान्तः इति ज्ञातुं नैव शक्यते। अतः प्रदीपस्य महत् प्राधान्यं वैयाकरणलोके।

**गुरोर्महेश्वरस्यापि कृत्वा चरणवन्दनम्** इत्यनेनास्य गुरोर्नाम महेश्वर इति, तथापि **हरिबद्धेन सारेण ग्रन्थसेतुना** इत्यादिना च प्रदीपस्याधारः भर्तृहरिप्रणीतं वाक्यपदीयमिति

---

१. सं.व्या.इ.पृ.३५४

२. वा.प. वृत्तिसमुद्देश्यः, पृ.६६१

३. म.भा.पृ.१४८

Scanned by CamScanner

च स्वेनैव स्पष्टीकृतम्।[1] मम्मट, रुद्रट, उद्भटेत्यादिनामसादृश्यात् कैयटः काश्मीरनिवासीत्यनुमीयते।[2] विक्रमतः पूर्वम् एकादशशताब्दिकोऽयम्।

### ❊ जयादित्य वामनौ

भाष्य-प्रदीप वाक्यपदीयाद्याकरग्रन्थाः लोके विराजन्ते। किन्तु लघु-नोपायेन शब्दसाधुत्वजिज्ञासूनां ते ग्रन्थाः नोपयुज्यन्ते। समुद्रोपमास्ते ग्रन्थाः। अतस्तेभ्यः पाणिनिसूत्रार्थो न स्पष्टो जातः। एतादृश्यां स्थितौ जयादित्यनामको महाविद्वान् आकरग्रन्थान् सम्यक् परिशील्य वृत्तिरूपं लघुव्याख्यानं व्यरचयत्। जयादित्यस्य कालो विक्रमतः पूर्वं ४३५ वत्सरः।[3] अष्टाध्याय्यां चतुर्णामेवाध्यायानां व्याख्याऽकारि जयादित्येन। इतरेषां चतुर्णां तु वामननामकेन महाविदुषा व्याख्यानं व्यधायि। उभाभ्यां जयादित्यवामनाभ्यां प्रणीतस्याग्र्य वृत्तिग्रन्थस्य काशिकावृत्तिः इति नाम। सुप्रसिद्धोऽयं ग्रन्थः।

तत्र पञ्चमाध्यायपर्यन्तं विद्वद्वरजयादित्येन विरचिता। शिष्टाश्चान्ये त्रयोऽध्यायाः। विद्वत् कुलपतिना वामनेन विरचिता इति विद्वत्सम्प्रदायः इति केषाञ्चिदभिप्रायः।[4] वस्तुतस्तु प्रथमद्वितीयपञ्चमषष्ठा जयादित्यकृतवृत्तयः। इतराः वामनकृतवृत्तयः इत्यभियुक्ताः।[5] वामनस्य कालो विक्रमीयः सप्तमशताब्दः।[6]

---

१. म.भा.पृ.१४८
२. म.भा.प्रदीपमङ्गलश्लोकेषु, पृ.३
३. सं.व्या.इ.पृ.४६१
४. का.वृ.प्र.भा.उपोद्घाते, पृ.१०
५. सं.व्या.इ.पृ.४५९
६. तत्रैव. पृ.४६१

Scanned by CamScanner

❊ हरदत्तः

काशिकावृत्तेरुपरि महावैयाकरणेन हरदत्तनामकेन पदमञ्जरी इति नाम्ना बृहती व्याख्या निरमायि।

**तातं पद्मकुमाराख्यं प्रणम्याम्बां श्रियं तथा।**

**ज्येष्ठं चाग्निकुमाराख्यमाचार्यमपराजितम्॥**

इति श्लोकेन हरदत्तेन स्वपरिचयो दत्तः। अनेन हरदत्तस्य पिता पद्मकुमारः, माता लक्ष्मीः, ज्येष्ठभ्राता अग्निकुमारः, गुरुरपराजिताचार्यः इति स्पष्टं ज्ञायत एव। **न धातुलोप आर्धधातुके**[१] इति सूत्रव्याख्यानावसरे हरदत्तः आत्मानमुद्दिश्य -

**प्रक्रियातर्कगहनप्रविष्टो हृष्टमानसः।**

**हरदत्तहरिः स्वैरं विहरन् केन वार्यते॥**

इति कथयामास।[२] अनेनास्य पाण्डितीप्रकर्षः स्पष्टो भवति। पाणिनिसूत्राणां स्पष्टार्थग्रहणे पदार्थपरिशोधने च वैयाकरणानाम् अत्यन्तमुपकारिका पदमञ्जरी।

**तस्मै शिवाय परमाय दशाव्ययाय।**

**साम्बाय-सादरमयं विहितः प्रणामः॥**

इत्यनेनायं शैवमतानुयायीति **यश्चिराय हरदत्तसञ्ज्ञाय विश्रुतो दशसु दिक्षु दक्षिणः** इत्यनेन च हरदत्तो दाक्षिणात्यः इति स्पष्टं प्रतीयते।[३] विक्रमीयैकादशशताब्दकालिको हरदत्तः।[४]

---

१. अष्टा.२.२.४

२. सं.व्या.इ.पृ.५८

३. तत्रैव. पृ.३

४. तत्रैव. पृ.५१६

Scanned by CamScanner

### ※ जिनेन्द्रबुद्धिः

काशिकावृत्तेः यावत्यो व्याख्या उपलभ्यन्ते परिज्ञाताः वा सन्ति, तासु बोधिसत्त्व-देशीयाचार्यजिनेन्द्रबुद्धिपादप्रणीता **काशिकाविवरणपञ्जिका** अथवा **न्यास** इत्यपर नाम्ना प्रसिद्धा सर्वप्राचीना महत्त्वपूर्णाचास्ति। न्यासकारोऽयं बौद्धमतस्य प्रामाणिक आचार्यः आसीत्। न्यासकारेण किञ्चिन्मात्रमपि स्वकीयः परिचयो न प्रदत्तः, अतः तस्येतिवृत्तं सर्वथा अन्धकारवृतमस्ति।[१]

### ※ रामचन्द्रः

अनेन महावैयाकरणेन प्रक्रियाकौमुदी नामको ग्रन्थः प्रणीतः। अत्र ग्रन्थे अष्टाध्यायी पाठक्रमो नाश्रीयते। सञ्ज्ञा-परिभाषा- सन्धिप्रभृतिप्रकरणविभागमाश्रित्य पद-साधुत्वसिद्धय आवश्यकानि सूत्राणि एकस्मिन्नेव स्थले निर्दिष्टानि। एषा च नूतना प्रणाली। अत्र ग्रन्थे समग्रस्य पाणिनीयस्य व्याख्यानं नास्ति। प्रायोऽस्य द्वादश [illegible] न्ति शेषवंशीयोऽयम्। रामचन्द्राचार्यस्य पिता कृष्णाचार्यः। विक्रमीय १४-१५ शताब्दयोर्मध्य-कालिकोऽयम्। स्पष्टमिदं सर्वं युधिष्ठिरमीमांसकमहाभागग्रन्थे।[२]

### ※ भट्टोजिदीक्षितः

शेषकृष्णस्य शिष्योऽयं, लक्ष्मीधरसूरेः पुत्रश्च।[३] प्रक्रियाकौमुद्याः **प्रकाश** नाम्न्या व्याख्यायाः कर्तुः शेषकृष्णेन प्रदर्शितं पन्थानमाश्रित्य समग्रं प्रसिद्धमष्टाध्यायी ग्रन्थं स्वग्रन्थे

---

१. सं.व्या.इ.पृ.२१२

२. सं.व्या.इ.पृ.५२९

३. सं.व्या.इ.पृ.४८६

Scanned by CamScanner

व्याचख्यौ। स एव ग्रन्थः **सिद्धान्तकौमुदी** नाम्ना प्रथितोऽस्ति लोके। अस्य ग्रन्थस्य **प्रौढमनोरमा** नाम्नीं बृहतीं व्याख्याम् अतानीत्। अष्टाध्यायीपाठक्रममाश्रित्य **शब्दकौस्तुभ** नाम्ना महता ग्रन्थेन भाष्यकैयटयोराशयं पुस्पोटयामास च।

प्रौढमनोरमायां, शब्दकौस्तुभे च तत्तत्प्रसङ्गानुसारं नव्यनैयाकिकपूर्वमीमांसकमतानि खण्डितानि[१], मण्डितानि[२] च महाभाष्यवाक्यपदीयादिग्रन्थप्रतिपादितानि मतानि। अनया रीत्या परमतखण्डनपुरस्सरं स्वमतं स्थापयन् शब्दकौस्तुभादौ निर्णीतान् सिद्धान्तान् १४ अनुष्टुप् श्लोकैः **वैयाकरणमतोन्मज्जन**मिति ग्रन्थे प्रतिपादयामास।[३]

इत्थं रीत्या वैयाकरणानां प्रातः स्मरणीयो भट्टोजिदीक्षितः शाङ्करभाष्यं परिशोध्य **तत्त्वकौस्तुभः** इत्याख्यं ग्रन्थं विरचयामास। अयं विक्रमीय १६-१७ शताब्दयोर्मध्यकालिकः।[४]

**❊ कौण्डभट्टः**

60/125

भट्टोजिदीक्षिताग्रजस्य रङ्गोजिभट्टस्य सुतोऽयं कौण्टभट्टः। सकलशास्त्रेषु निष्णातोऽयम्। पितृव्यस्य भट्टोजिदीक्षितस्य सकाशात् सकलानि शास्त्राण्यधीत्य तत्कृत वैयाकरण-मतोन्मज्जन नामकग्रन्थस्य वैयाकरणभूषणमिति नाम्नीं व्याख्यां लिलेख। प्रौढग्रन्थोऽयम्। अनेनैव महाविदुषा पाठकसौकर्यमपेक्ष्य तत्संक्षिप्तरूपो **वैयाकरणभूषणसारः** कृतः। अस्य च ग्रन्थस्य १. दर्पणः (हरिवल्लभकृतः), २. काशिका (हरिरामदीक्षितकृता), ३. परीक्षा

---

१. प्रौ.म., पृ.६३२-६३५, ६४९, ६५०
२. तत्रैव, अव्ययीभावप्रकरणम्. पृ.७३५
३. भू.सा. (तत्त्वदर्शिनीसहितः), पृ.९
४. सं.व्या.इ.पृ.४८७

Scanned by CamScanner

(भैरवमिश्रकृता), ४. भूषणव्याख्या (कृष्णमिश्रकृता), ५. सरला (ने ने गोपाल कृष्णशास्त्रि कृता), ६. प्रभा (पञ्जोलिबालकृष्णकृता) प्रभृतयो बह्वयो व्याख्याः सन्ति।

अथापि सर्वाः एताः व्याख्याः मूलग्रन्थानवेक्षणेन विरचिताः।[१] अतएव तत्तत् अवबोधनेऽसमर्थाः इति धिया राष्ट्रपतिसम्मानितैः, उत्तरप्रदेशसंस्कृताकाडमीतः पुरस्कृतैः, व्याकरणवागीशैः, महामहोपाध्यायैः, व्याकरणरत्नेत्याद्युपाधिभाजैः श्री पेरि सूर्यनारायणशास्त्रिचरणैः, तत्त्वदर्शिनी इति सुप्रसिद्धा व्याख्या प्रणीता। कौण्डभट्टोऽयं विक्रमीय १६-१७ शताब्दयोर्मध्यकालिकः।[२] नैयायिकमीमांसकमतानां खण्डने प्रवृत्तोऽयं वैयाकरणभूषणसारः।[३]

## ❊ हरिदीक्षितः

भट्टोजिदीक्षितपुत्रवीरेश्वरदीक्षितस्य पुत्रोऽयं हरिदीक्षितः।[४] भट्टोजिदीक्षित विरचित प्रौढमनोरमायाः लघुशब्दरत्नमिति बृहती व्याख्या अनेन व्यलेखि। वस्ततोऽयं ग्रन्थः तच्छिष्येणैव नागेशेन विरचितः। किन्तु गुरोः सन्तुष्टये गुरुचरणान[illegible].जित इत्यैतिह्यम्। अत्र च बहूनि प्रमाणान्यपि दृश्यन्ते।[५] अतो बृहच्छब्दरत्नमिति व्याख्यानमेव हरिदीक्षितकृतं लघुशब्दरत्नग्रन्थस्य भैरवी-भावप्रकाशादयः प्रामाणिकाः व्याख्याः सन्ति। हरिदीक्षितो नागेशस्य गुरुरिति हेतोस्तत्समकालिकोऽयम्। तस्य च कालः विक्रमीयाष्टादशः शताब्दः।[६]

---

१. वै.सि.ल.म.पृ.१३९४

२. वै.भू.सा.पृ.३,४

३. सं.व्या.इ., पृ.४८७

४. तत्रैव., पृ.५३०

५. प्रौ.म.(उपोद्घातः), पृ.२४-३९

६. सं.व्या.इ.पृ.१२७

Scanned by CamScanner

## ※ आचार्यः कैयटः

पतञ्जलिमुनिना प्रणीतस्य महाभाष्यस्य प्रदीप नाम्नी एका महत्त्वपूर्णा व्याख्या कैयटेन विरचिता। महाभाष्यस्योपलब्धासु व्याख्यासु इयमेव व्याख्या सर्वातिशयिनी विद्वत्समादृता च।

## ※ कैयटस्य पितरौ

कैयटकृतस्य महाभाष्यप्रदीपस्य प्रत्यध्यायसमाप्तौ या पुष्पिका लभ्यते, तया ज्ञायते यत् - कैयटस्य जैयटोपाध्याय आसीत्। यथा - **इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे** इत्यादि।

उद्योतकरस्योद्धरणं चन्द्रसागरसूरिणा हैमबृहद्वृत्तौ आनन्दबोधिनी टीकायां समुद्धृतम्। उद्योतकरः कैयटस्य शिष्य आसीत्, उद्योतकरोऽयं न्यायवार्तिकनिर्मातुरुद्योतकराद् भिन्नः प्रतीयते। कैयटेन आनन्दवर्द्धनाचार्यकृतस्य देवीशतकस्य टीका विरचिता, तत्र कैयटस्य पितुर्नाम चन्द्रादित्य इत्यस्ति निर्दिष्टम्। अतोऽयं कैयटः प्रदीपकर्तुः कैयटाद् भिन्नः प्रतीयते।

62/125

Scanned by CamScanner

### ❊ नागेशभट्टः

महामहिमशाली निखिलशास्त्रतत्त्वज्ञानगुणैकमाली विद्वत्कुलमौलिमणिर्माननीयोऽयं नागेशभट्टः कदा कुत्रास्मिन् धराधाम्नि समुत्पन्नः, केन प्रकारेण क्व वा सकलां पाण्डित्य-कलामासादितवान्, कदा च पाञ्चभौतिकं शरीरं जहावित्यादिविषये निश्चयेन किञ्चिदपि व्यवस्थापयितुं न शक्यते एतद्विषयकप्रमाणसामग्र्यभावात्।

प्राक्तनभारते आसीदियं रीतिः यद्प्राचीनानां तत्र भवतां परमप्रसिद्धिमुपगतानामपि महापुरुषाणां जीवनचरितानि याथातथ्येन न ज्ञायन्ते। न चासीत् स्वजीवनचरित्रविषयेषु त्रिकाल दर्शिष्वस्माकं पूर्वजेषु स्वरचनासु क्वचन स्वविषयकेतिहासलेखनप्रणाली। अतोऽधुना पाश्चात्या ऐतिह्यविदः पदे-पदे भारतीय इतिहासे ऐतिहासिकपुरुषजीवनस्थितिविषयेषु च शङ्कापङ्के निमज्जन्ति, परं ये भारतीयमर्यादापरम्पराज्ञानवन्तः ते भारतीयानामैतिह्यविषये वृथा न विवदन्ते न च प्रमाणाभावात् तेषां विषये अज्ञानधूलिं प्रक्षिपन्ति। भारतीया हि मनीषिणः सिद्धान्तेषु **वज्रादपि कठोराणि मृदूनि कुसुमादपि** इति सूक्तिं चारितार्थवन्तः स्वस्वरचना चमत्कारमेव प्रकाशयन्ति स्म विस्तारयन्ति स्म च स्वामन्दज्ञानसन्दोहं सर्वजनहिताय सर्व-

Scanned by CamScanner

जनसुखाय। भारतीयप्राक्तनज्ञानस्य बहवोंऽशाः मन्ये बहोः कालात् वैदेशिकैराक्रान्तत्वाद् भ्रष्टाः, महाकराले कालोदरे च सन्निविष्टाश्च। श्रूयते हि तक्षशिलाया नालन्दायाश्च पुस्त-कालयाः षण्मासान् सततं ज्वलन्त आसन्। भारतीयप्राक्तनप्रतीका ये आसन् ते मौहम्मद कुलाक्रान्ते तदानीं भारते निःशेषतां गताः। अतः मन्ये ऐतिहासिकानि प्रमाणानि भूयस्त्वेन नष्टानि। अतोऽद्यत्वे साक्षात् परम्परया वा क्व च नान्यैः प्रमाणैः भारतीयमनीषिणां जीवन-वृत्ताणि समीक्ष्यन्ते।

महामहिमानः स्वनामधन्या महामहोपाध्यायाः श्रीमन्तो नागेशभट्टाः कतम देशालङ्कार-भूता आसन् इति तु सर्वथा सन्दिग्धमेव, परं ते आसन् महाराष्ट्रिया इति गुरुपरम्परया नाम्ना लोकोक्तिभिश्चावगम्यते। भट्टनागेशस्य गुरुर्भट्टोजिदीक्षितस्य पौत्रो वीरेश्वरदीक्षितपुत्रो हरि-दीक्षित आसीत्। भट्टोजिदीक्षितः महाराष्ट्रिय आसीदिति निर्विवादम्। तदानीमतिशयवैदुष्य-कारणात् तेषां भट्ट इत्युपाधिः प्रचलति स्म। अतः नागेशस्य 'भट्ट' इत्युपाधिर्वैदुष्यसूचनायैव इत्यवगन्तव्यम्। भट्टोजिदीक्षितः, हरिदीक्षितः इत्यादौ 'जि' इत्यादरसूचकवचनं मन्तव्यम्। अद्याप्युत्तरभारते महापुरुषाणामादरातिशयेन नामान्ते जी इत्यभिधानं दृश्यते। तच्चान्वर्थकं, यतो हि भट्टान् जयति इति भट्टोजिः विद्वज्जिदित्यर्थः।

65/125

सप्तदशक्रीष्टाब्दकालो नागेशभट्टस्याविर्भावकाल इति सर्वे इतिहासवेत्तारः प्रति-पादयन्ति। अस्यैव भारतीयवैक्रमकालानुसारिगणनां सं १७३१ वैक्रमादारभ्य १८१० वैक्रम पर्यन्तं नागेशभट्टकालो निश्चीयते। क्रीष्टाब्दकालानुसारेणायं कालः १६७४ ईशवीयतः प्रारभ्य १७५३ ईशवीयमध्यकालः सिद्ध्यति। इदं कालनिर्धारणं तदानीन्तनजयपुरनरेशानुष्ठीयमाना-

Scanned by CamScanner

श्वमेधयज्ञप्रसङ्गद्वारा सम्भवति। अस्या घटनाया विवरणं म.म.पं. दुर्गाप्रसादकृत रसगङ्गाधर ग्रन्थभूमिकायां दृश्यते। तत्रैवं लिखितं यत् सवाई महाराजजयसिंहः स्वराजधान्यां जयपुरे १७१४ क्रीष्टाब्दे अश्वमेधयज्ञयोजितवान् समाहूतवाँश्च यज्ञाचार्यरूपेण काशीतो नागेश-भट्टान्। परं क्षेत्रसंन्यासग्रहणकारणात् नोपस्थातुं शक्यते इति तन्निमन्त्रणं प्रत्याख्यातवान् नागेश इति तत्र रसगङ्गाधरभूमिकायां लिखितम्। एतेनेदं व्यज्यते यद् यज्ञाचार्यपदवीग्रहण-समर्थोऽप्यहं क्षेत्रसंन्यासव्रतानुष्ठानादन्यत्र गन्तुमसमर्थः। एतेन अर्थसम्मानयोर्लोभाभावोऽपि नागेशस्य ज्ञायते। नागेशभट्टा महाराष्ट्रियऋग्वेदपाठिनां ब्राह्मणकुले प्रादुरभूवन् इति **कालोप-नामक शिवभट्टसुतसतीगर्भज नागेशभट्टविरचिते सिद्धान्तकौमुदीव्याख्याने पूर्वार्द्धं समाप्तम्**[१] इति लेखात् इति श्रीमदुपाध्यायोपनामकं शिवभट्टसुतसतीगर्भज नागेश **भट्टकृते शब्देन्दुशेखराख्ये सिद्धान्तकौमुदीव्याख्याने उत्तरार्धं समाप्तम्**[२] इति लेखाच्च ज्ञायते। एवमेव भानुदत्तकृत 'रसमञ्जरी' ग्रन्थस्य एका टीका नागेशभट्टेन लिखिता। तस्याः कालो विक्रमसम्वत १७६९ वर्तते। नागेशभट्टकराङ्कितहस्तलेखरूपेणेदं पुस्तकं सम्प्रति 'यूरप' द्वीपस्य आंग्लानां ब्रिटेनदेशे लण्डननगरीय 'इण्डिया आफिस् लाइब्रेरी' इत्याख्ये पुस्तकालये विद्यते। एतेनाप्युपर्युक्तकालस्यैव पुष्टिर्भवति।

Scanned by CamScanner

**❋ नागेशभट्टकृतयः**

म.म. नागेशभट्टस्य पाण्डित्यं चतुरस्रम्। अतस्तेन प्रायः समस्तशास्त्रेषु ग्रन्थाः प्रणीताः। नागेशग्रन्थानां संख्यावलोकनेनेदं प्रतिभाति यद् कथमेते विभिन्नविषयका ग्रन्था एकेनैव नागेशेन लिखिता इति। पुस्तकरचनाचातुर्येण तेषां महत्या संख्यया च नागेशस्य लोकोत्तरवैदुष्येण सहैव क्रियाशालितापि लक्ष्यते। अग्रे यथाविषयं केचन ग्रन्था उद्ध्रियन्ते -

**व्याकरणशास्त्रे यथा** - महाभाष्योद्योतः, शब्देन्दुशेखरः, लघुशब्देन्दुशेखरः, परिभाषेन्दुशेखरः, वैयाकरणसिद्धान्तमञ्जूषा, वैयाकरणसिद्धान्तलघुमञ्जूषा, वैयाकरणसिद्धान्तपरमलघुमञ्जूषा, शब्दरत्नम्, शब्दकौस्तुभस्य विषमीटीका, अष्टाध्यायीसूत्रपाठः, तिङन्तसंग्रहः, धातुवृत्तिः, णेरणौ वादार्थः, वैयाकरणकारिका, वृत्तिवादः, शब्दानन्तसागरसमुच्चयः, सुप्तिङन्तसागरसमुच्चयः, स्फोटवादप्रत्याख्यानसङ्ग्रहः इत्यादयः।

**साहित्यशास्त्रे** - कुवलयानन्दटीका - अलङ्कारसुधा, गोविन्दठक्कुरकृतकाव्यप्रदीपस्य टीका - उद्योतः, गुरुकाव्यप्रदीपोद्योतः, रसगङ्गाधरटीका - गुरुमर्मप्रकाशः, रसतरङ्गिणीटीका, रसमञ्जीरटीका च प्रकाशः गीतगोविन्दटीका, सुधालहरीटीका इत्यादयः।

Scanned by CamScanner

**धर्मशास्त्रे** – तीर्थेन्दुशेखरः, आचारेन्दुशेखरः, तीर्थेन्दुशेखरः, श्राद्धेन्दुशेखरः, प्रायश्चित्तेन्दुशेखरः, प्रायश्चित्तसंग्रहः, तिथिनिर्णयः, सापिण्डीमञ्जरी, सापिण्ड्यदीपिका, गङ्गाभक्तकायस्य धर्मप्रदीपिकाटीका, गोत्रप्रवननिर्णयः, व्रात्यप्रायश्चित्तनिर्णयः, इष्टिकालनिर्णयः, प्रयोगतरणिः, प्रभाकरचन्द्रतत्त्वदीपिका, तात्पर्यदीपिका, त्रिस्थलिसेतुः, कालेन्दुशेखरप्रभृतयः।

**तर्कशास्त्रे** – लक्षणरत्नमाला, तर्कभाषाटीका च।

**वेदव्याख्याने** – वेदसूक्तभाष्यम्, एकश्रुतिवादश्च।

**वेदान्ते** – व्याससूत्रेन्दुशेखरः।

**सांख्ये** – लघुसांख्यसूत्रवृत्तिः।

**योगे** – पातञ्जलसूत्रवृत्तिः, पातञ्जलसूत्रवृत्तिभाष्यच्छायाव्याख्या च।

**तन्त्रे** – परमार्थसारविवरणम्, दुर्गासप्तशतीटीका – नागेशी, चण्डीपाठटीका, चण्डीस्तोत्रप्रयोगविधिः, कात्यायनतन्त्रमित्यादयः।

**पुराणे** – वाल्मीकिरामायणस्य टीका – तिलकम्, अध्यात्मरामायणस्य टीका (टीका इयं नागेशाश्रयदातुर्नाम्ना) इत्येव केचनमुद्रिताः, केचन हस्तलेखरूपेण सङ्कलिताश्च नागेशग्रन्थाः तत्र तत्र उपलभ्यन्ते। व्याकरणशास्त्रे च सारभूता अद्यत्वे शेखरादयो ग्रन्था व्याकरणशास्त्रस्य मानदण्डत्वेन स्थिता इव भवन्तीति।

Scanned by CamScanner